# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಲಿ
**ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – 560 003**

**KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD**
**Malleshwaram, Bengaluru – 560 003**

## 2024-25ರ ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆ-1
## S.S.L.C. MODEL QUESTION PAPER-1 : 2024-25

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

**ವಿಷಯ ಸಂಕೇತ : 16-S** | **Subject Code : 16-S**

ಸಮಯ : 3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು ] [ Time : 3 Hours 15 Minutes

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

---

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
3. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
4. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
3. प्रश्नानाम् अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
4. प्रश्नपत्रमुत्तरितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

[ Turn over

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'तनयः' अस्य समानार्थकपदम् इदं भवति ।

   (A) आत्मजः (B) अनुजः
   
   (C) अग्रजः (D) अजः

2. 'दुर्लभम्' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) मधुरम् (B) उभयम्
   
   (C) सुलभम् (D) कठिणम्

3. 'योगी' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) योगिन् (B) योगिनी
   
   (C) योगवती (D) विदुषी

4. 'अवर्णयत्' अत्र एषः लकारः वर्तते ।

   (A) लोट् लकारः (B) लट् लकारः
   
   (C) लङ् लकारः (D) लिट् लकारः

5. 'जगत्याम्' अत्र एषा विभक्तिः वर्तते ।

   (A) प्रथमा विभक्तिः (B) सप्तमी विभक्तिः
   
   (C) तृतीया विभक्तिः (D) चतुर्थी विभक्तिः

6. 'शक्रः महत्तरां भिक्षां याचते' । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

   (A) काम् (B) कथम्
   
   (C) कति (D) कः

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. नागार्जुनः – रस रत्नाकरः :: भास्कराचार्यः – .................... ।

8. अभयदायिनी – चन्नम्मा :: कीर्तिकायः – .................... ।

9. सुरुचिः – उत्तमः :: सुनीतिः – ................ ।

10. रमणः – महर्षिः :: गणपतिः – .................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. सर्वोऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?

12. तृषितः चकोरः कम् आश्रयति ?

13. भारतीयाः कथं भिन्नमार्गमाश्रिताः ?

14. पाण्डवेषु कः राजपदवीम् अलभत ?

15. सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?

16. सत्यव्रतशास्त्रिमहोदयः कदा अजायत ?

17. भोजः कुत्र हन्तव्यः ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. पादपजातयः काः ? तासां जन्म कथं भवति ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. नरस्य वृत्तं के जानन्ति ?

21. कैः षड्भिः निदानैः रोगाः सम्भवन्ति ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) मुनिरिति ।

b) एतदुपरि ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) मच्छिरः ।

b) विषकण्ठः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) दिनं दिनं प्रति =

b) करिणाम् इन्द्रः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) नृपस्य मनोरथं निवेद्य जगाम ।

b) बालेन पाठः पठनीयः ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकः पाठं पठति ।

b) शिशुः हसति ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಹಿಂದೆ ದಶರಥನೆಂಬ ರಾಜನಿದ್ದನು. ಅವನಿಗೆ ನಾಲ್ಕು ಮಕ್ಕಳಿದ್ದರು. ಅವರಲ್ಲಿ ಶ್ರೀರಾಮನು ಹಿರಿಯನು.

Long ago there was a king named Dasharath. He had four children Shree Rama was the eldest son.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. विद्यार्थीजीवनम् अमूल्यं वर्तते । विद्यार्थी सदा उत्साहेन गुरोः मार्गदर्शनम् अनुसरेत् ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. 'भवानेव संस्कृतेन ग्रन्थान् लिखतु' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

29. भवतु अस्माकं महाराज्ञी अभयदायिनी ।

कः पाठः ? के अवदन् ? महाराज्ञी का ?

30. मया भोजः रक्षितः ।

कः पाठः ? कः वदति ? कं वदति ?

31. प्रशास्त्यस्य केसरी नाम वै पिता ।

कः पाठः ? कः अवदत् ? केसरी कस्य पिता ?

**अथवा**

रसे गन्धे न रज्यते ।

कः पाठः ? कः अवदत् ? कः न रज्यते ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत।** **2 × 3 = 6**

32. भासः ।

33. डा० के.एस्. नागराजन् ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 × 3 = 9**

34. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

35. आत्मशक्तिवर्धिता विशालदृष्टि संयुता
द्वेषभाववर्जिता निरन्तरं सुखप्रदा ।
राष्ट्रसत्वधारिणी तमः प्रखण्डखण्डिनी ।
भारतीय भावना विवृद्धिमेतु भारते ।।

**अथवा**

शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना ।
फलान्याहर्तृकामा वै निष्क्रान्ता गहने वरा ।।

36. आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत।** **1 × 3 = 3**

37. कमलमिव चारूवदनम् ।

**अथवा**

वचनामृतम् ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. धर्मश्च जानाति नरस्य वृत्तम् ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. क्षारं जलं ..........................................................................

.......................................................................................... ।

..........................................................................................

.......................................................................... समुद्गिरन्ति ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. तपोधनः दधीचिः त्यागधनः कथं संवृत्तः ? सङ्गृह्य लिखत ।

41. भीष्म–युधिष्ठिरयोः संवादं पद्यानुगुणं विवृणुत ।

**अथवा**

हनूमतः जननं बाल्यवृत्तान्तञ्च पद्यानुगुणं लिखत ।

42. भगवान् रमणमहर्षिः महर्षित्वं स्वजीवनेन दर्शितवान्–विवृणुत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. अस्माकं राष्ट्रपिता गान्धीमहोदयः । गान्धीजी भारतस्य स्वातंत्र्यसम्पादनार्थं सर्वत्यागं कृतवान् । सः उपवासं कृत्वा सर्वेषां ऐक्याय प्रयत्नम् अकरोत् । एवमेव सर्दार् वल्लभभाई पटेल्, भगतसिंहः,

चन्द्रशेखर आजादः सुभाषचन्द्रबोस् इत्यादयः बहवो नेतारः स्वातंत्र्याय स्वात्मानं समर्पितवन्तः । तेषां सन्देशस्मरणं कृतज्ञतासमर्पणं च भारतीयानां कर्त्तव्यम् ।

**प्रश्नाः**

i) अस्माकं राष्ट्रपिता कः ?

ii) सः किमर्थं प्रयत्नम् अकरोत् ?

iii) के के नेतारः स्वातंत्र्याय स्वात्मानं समर्पितवन्तः ?

iv) भारतीयानां कर्त्तव्यं किम् ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. तुमकरूमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा पर्वनिमित्तम् दिनद्वयस्य विरामं सम्प्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं निवेद्य पितरं/मातरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसरमालिन्यानि निवारणोपायाः च ।

**अथवा**

समाचारपत्रम् ।